ज्वरयुतं विद्यात्पित्तात्मकं तु तम्। तिलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम्। सर्वलिङ्गसमायुक्तं सन्निपातात्मकं वदेत्” सु०।

**योषा** स्त्री युष-अच् टाप्। स्त्रियाम् नार्य्याम् अमरः।

**योषित्** स्त्री युष-इति। नार्य्याम् अमरः। हलन्तत्वाद्वा टाप्। योषितापत्र शब्दर०। [प्रियमात्रे त्रि०।

**योषित्प्रिया** स्त्री ६त०। १हरिद्रायां भावप्र०। २नारी-

**यौक्तिक** त्रि० युक्तित आगतः ठक्। १युक्तिसिद्धे २योग्ये च। युक्तौ अधिकृतः ठक्। ३नर्मसचिवे पु० शब्दर०।

**यौगिक** त्रि० योगात् प्रकृतिप्रत्ययार्थसम्बन्धात् आगतः ठक्। प्रकृतिप्रत्ययलभ्यार्थवाचके शब्दे यथा पाचकादिशब्दः पाककर्तृवाचकः। योगाय प्रभवति ठक्। २योगयोग्ये

**यौट** संबन्धे भ्वा० पर० सक० सेट्। यौटति अयौटीत्। ऋदित् चङि न ह्रस्वः।

**यौड़** यौटवत् सर्वम्। यौड़ति अयौड़ीत् ऋदित्।

**यौतक** न० युते विवाहकालेऽधिगतम् वुण्। विवाहकाले लब्धे धने हला०। इति दायभागानुसारिणः। वीरमि० तु “यु मिश्रणे इति धात्वनुसारात् विवाहकाले एकासनोपविष्टयोर्वधूवरयोर्यद् बन्धुभिर्दीयते तद्युतयोरिदं यौतकमिति व्युत्पत्त्या यौतकमित्युच्यते” इत्युक्तम् अत एव निघण्टौ युतयोर्यौतकमित्युक्तम्। अन्ये तु विवाहे स्त्रीपुंसावेकशरीरतया मिश्रितौ भवत इति “अस्थिभिरस्थीनि मांसैर्मांसानि”इत्यादिश्रुत्या तयोक्तेः विवाहेन युतयोरिदम्” इत्याहुः। वस्तुतः विवाहकालोत्तरमेकासनोपविष्टयोरेव दत्तं धनं यौतकं लोकप्रसिद्धं वीरमि०उक्तं साधीयः। “मातुश्च यौतकं यत् स्यात् कुमारी भाग एव सः” मनुः।

**यौतव** न० यु-तु योतुः तस्य भावः अण्। परिमाणे अमरः।

**यौतुक** न० योतुर्योगकालस्तत लब्धं अण्। विवाहकाले लब्धे धने यौतकशब्दे दृश्यम्।

**यौधाजय** न० अहगाने १प्र० दर्शिते सामभेदे “रौरवयौधाजये वाहृते भवतः” श्रुतिः।

**यौधेय** पु० योध एव आयुधजीविसंघत्वात् स्वार्थे ढक्। १योद्धरि। २उत्तरस्थदेशभेदे पु० वृ० स० १४ अ०। युधायाः अपत्यम् “द्व्यचः”पा०ढक्। ३युधाया अपत्ये। ततःस्वार्थे अञ् शार्ङ्गर० स्त्रियां ङीप्। यौधेयी।

**यौन** त्रि०योनितः योनिसम्बन्धात् आगतम् अण्। १योनितः प्राप्ते। योनेरयमण्। २वैवाहिकसम्बन्धे पु०। प्रा० वि० बौधायनः “संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद् यौनात् सद्यो हि शयनासनात्”। सुमन्तुः “यश्चैतैर्यौनमौखस्रौवादीनां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यादिति”।

**यौवत** न० युवतीनां समूहः अण्। युवतिसमुदाये अमरः।

**यौवन** न० यूनो भावः अण्। १तारुण्ये “आ षोडशाद् भवेद् बालस्तरुणस्तत उच्यते। वृद्धः स्यात् सप्ततेरूर्ध्वम्”इत्युक्ते २अवस्थाभेदे। [फोडा)व्रणभेदे शब्दमा०

**यौवनकण्टक** पुंन० यौवनस्य कण्टक इव चिह्नम्। (वयस्

**यौवनदशा** स्त्री कर्म०। तारुण्ये अवस्थाभेदे।

**यौवनलक्षण** न० ६त०। १स्तने २लावण्ये च मेदि०।

**यौष्माक** त्रि० युष्माकमिदम् युष्मद्+अण् युष्माकादेशः। युष्मत्सम्बन्धिनि। खञ्। यौष्माकीनोऽप्यत्र त्रि०।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य सङ्कलिते वाचस्पत्ये यकारादि-शब्दार्थसङ्कलनम्।

---

## र

रकारः व्यञ्जनवर्णभेदः स्पर्शवर्णोष्मवर्णयोर्मध्यस्थत्वात् अन्तःस्थवर्णः। अस्योच्चारणस्थानं मूर्द्धा। जिह्वाग्रेण मूर्द्धस्थानस्येषत्स्पर्शेनोच्चारणादस्य आभ्यन्तरप्रयत्न ईषत्स्पृष्टम्। बाह्यप्रयत्नाश्च संवारनादघोषा अल्पप्राणश्च। वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा “रो रक्तः क्रोधिनी रेफः पावकस्तैजसो मतः। प्रकाशो दर्शनो दीप्तो रततृष्णा परं बली। भुजङ्गेशो मतिः सूर्य्यो धातुः रक्तप्रकाशकः। व्यापको रेवती दानं दक्षांसो वह्निमण्डलम्। उग्रवेगा स्थूलदण्डो वेदकर्णोपलाम्बरा। प्रकृतिः सुगलो ब्रह्मशब्दश्च गायको घनः। श्रीकण्ठ अग्नि हृदयं सुखदो त्रिपुरसुन्दरी। सविन्दुर्योनिजो ज्वाला श्रीशैलो विश्वतोमुखी”। अस्य ध्येयरूपं यथा “रेफञ्च चञ्चलापाङ्गि! कुण्डलीद्वयसंयुतम्। रक्तविद्युल्लताकारं पञ्चदेवात्मकं सदा। पञ्चप्राणमयं वर्णं